प्रवेश सं० ३२३ विषयः वेदः क्रम सं०

नाम आपस्तम्ब प्रायश्चित्त सार: ग्रन्थकार मोल्होपनामक त्र्यम्बकाभिध:

पत्र सं० १-३२

श्लोक सं० अक्षर सं० (पंक्तौ) ४१ पंक्ति सं० (पृष्ठे) १०

आकार: ९.५" x ४" लिपि: दे. ना. १७७५ आधार: काग.

वि० विवरणम् पू०

002778

पी० एस० यू० पी०--७७ एम० सी० ई०--१६५१--५० ०००

कृ. य. आ. प्रा. (१४१)

Indira Gandhi National Centre for the Arts

३२ आपस्तंबप्रायश्चित्तसार : ३२

प्रा०

१ श्रीगणेशायनमः॥ॐ॥श्रीविठ्ठलेशायनमः॥केशकेशवरूपैर्यः सृजत्यवनिहंतिच॥तंगणेशमहंवंदेस्म
तमात्रोघनाशनं॥१॥मोल्हापनामकः कृष्णतनुजस्त्र्यंबकाभिधः॥रामांडाराड्डुद्दन्नात्केशव्याख्यवि
शेषतः॥२॥प्रायश्चित्तीर्विविच्याहंतासांसारमयत्नतः॥बालानामल्पबुद्धीनांकुर्वेत्याश्रुहितायवै॥३॥
श्रुतिलक्षणंप्रायश्चित्तंविध्यपराधेविधीयते॥एकस्मिंदोषेश्रूयमाणेनिप्रायश्चित्तानिसमस्तुश्चीरार
न्नर्थो नरत्वाज्जपोहोमइज्याचदोषनिर्घातार्थानिभवंति अनंतरंदोषात्कर्तव्यानिनिर्हृतेदोषेपुनःकृ
त्तनंकर्मतस्यनावचनात्पुनःप्रयोगः॥श्री॥कालस्कंप्रायश्चित्तानांनिमित्तानंतरं॥अपराधोन्यथाकर राम०
णमकरणंवा॥पुनराधानंतुनिमित्तानंतरमेवकर्तव्यं॥नष्टघग्निपुत्रविनाशजातआग्नीनुत्साद्यपुत्रवि
नाशनिमित्तअग्न्युत्सर्गकृत्वापुनराद्धीतति॥पुत्रजन्मनितुतदानीमेवजातकर्मकृत्वाततोजीवति
पुत्रेश्चवितापर्वणिजातेष्टिःकर्तव्या॥पदाज्ययाजाज्यभागाघाराद्युपकारांगानिविस्मृतानितदा आ १
समाप्तः प्राक्स्मृतंचेत्तानिकर्तव्यानि॥समाप्त्यनंतरंलोपः॥व्रीहियवादीनांप्रोक्षणंतुतस्ययागस्यैवक

त्तव्यं॥यत्रांगलोपेपिसांगस्यप्रधानस्यपुनःप्रयोगएवंवचनमस्ति॥तत्रोदाहरणं॥यथान्वाद्युन्यापु
नरुद्धृत्यादध्यान्यामिष्टिमनुल्बणांतन्वीतस्या॥इतिअत्रसांगस्यप्रधानस्यपुनःप्रयोगः॥अस्यापिगौ
णकालोस्ति॥तयादर्शपूर्णमासादिनांगौणकालः॥अपूर्यमाणपक्षोदर्शस्य॥कृष्णःपौर्णमासस्य॥
सर्वमहःप्रातराहुतेस्थाने॥सर्वारात्रिःसायमाहुतेः॥एतेषुकालेष्वतीतेषुप्रायश्चित्तमेव॥नप्रयोगः॥
यत्रदर्शपूर्णमासादावेकस्यप्रधानस्यलोपस्तत्रतंत्रसमाप्तेःप्राक्स्मृतंचेन्निर्वापादिप्रधानंकर्तव्यं॥
समाप्तेतंत्रप्रणयनादिप्रयाजाद्यनुयाजादिसहतत्प्रधानंकर्तव्यं॥कालांतरेपिस्मृतंचेत्प्रायश्चित्तंस
त्यातस्येष्टिः॥ ॥इतिसमाप्तापरिभाषा॥अथप्रयोगः॥तुभ्यंताअंगिरस्तमेत्यन्वाहिताग्निःप्रवासं
जुहुयात्॥पृथगरणीग्नीनिसमारोप्यप्रयातिपत्रवसेत्तदत्तामिष्टिंसंस्थापयेत्॥तत्रप्रयोगः॥अ
न्वाधानेकृतेयजमानस्यदेवात्मानुयाद्वाभयात्सग्रहप्रयाणंभवति॥तदासगृहंप्रयास्यामीतिबुधासर्वाएक
पकरणानिगृहीत्वाऽऽहवनीयेयजमानोजुहोति॥तुभ्यंताअंगिरस्तमविश्वाःसुक्षितयःपृथक्॥अग्नेकामा

Indira Gandhi National Centre for the Arts

प्राय०
२

ययेमिरेस्वाहेति॥ अग्नये कामायेदं॥ ततः अयं ते योनिरितिमंत्रावृत्त्या पृथगग्नीन्समारोपयेत्॥ द्वितरयो
लौकिकारण्योः॥ नात्रात्मसमारोपः॥ भयरहितेदेशे गत्वा अग्नीन्मथित्वा उपावरोह जातवेद इति निर्वर्त्य मा
नजपं कृत्वा जाते अयतनेषु प्रतिष्ठाप्य॥ इदं श्रेयोवसानं यदागाम् स्योनो मे द्यावापृथिवी अभूतां॥
अनमीवाः प्रदिशः संतु मह्यं गोमद्धनवदश्ववत्पुरुषवद्धिरण्यवत्सुवीरवत्स्वाहा॥ द्यावापृथिवीभ्यामिदं
न मम॥ ..... नाल्पवासे॥ अथ कृतांतादारभ्येष्टिसमापयेत्॥
... ॥ अवसितहोमं स्थिरकालवासविषय एव॥
यद्यन्वाहितागेनराहवनीयोनुगच्छेदन्वाग्निरुषसामग्रमख्यदित्यन्यं प्रणीय भूरित्युपस्थाप्याग्नये व्रतपतये राम०
हविष्मान् आविवासति॥ तस्मै पावकमृडय स्वाहेति पूर्णं स्रुवं सर्वप्रायश्चित्तं जुहुयादिदं विष्णुर्विचक्र
मइति आहुतिं जुहुयात्॥ जपेदिसेके मनसा व्रतोपायनीयं यजुर्जपेत्॥ अन्वाहितेष्वग्निषु यद्याहव
नीयोनुगच्छेत्तदा अन्वाहितमनुगतमाहवनीयमुत्पाद्य धिष्ण्या मीति संकल्प्य अन्वग्निरुषसामग्रमख्य २
दन्वहानि प्रथमो जातवेदाः॥ अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आततानेति नेत्यन्यं प्रणीय भू

अग्नये पावका
रितिमनसोपस्थानं कुर्यात्॥ ततो यो अग्निं देववीतये हविष्मानिति पूर्णेन स्रुवेण जुहोति॥ अग्नये पावका
येदं॥ ततो जुह्वा जुहोति॥ इदं विष्णुर्विचक्रमे॥ विष्णव इदं॥ ततः सर्वप्रायश्चित्तं जुहुयात्॥ ततो
मनसा यजमानो जपति॥ अग्ने व्रतपते॰ वायो व्रतपते॰ आदित्य व्रतपते॰ व्रतानां व्रतपते॰ राध्यता
निति॥ व्रतोपायनीयजपानंतर्यं॥ यः कश्चनानुगच्छेदेतदेव प्रणयनं व
जमावर्तेत॥ यदि गार्हपत्योनुगच्छेत्॥ अन्वाहिते अनुगतं गार्हपत्यं उत्पाद धिष्ण्यामीति संकल्प्य॥
अनुगतगार्हपत्यजस्मनारणीसंस्पृश्य॥ मथित्वाऽयतने निधाय भूरित्युपस्थानादि समानं॥ दक्षि
णाग्न्यनुगमने॥ अन्वाहितमनुगतं दक्षिणाग्निमुत्पाद धिष्ण्यामीति संकल्प्य॰ तद्भस्मी गार्हपत्यात्
लीय भूरित्युपस्थानादि समानं॥ केचिद्धोमव्यतिरिक्तं तस्य तस्याग्नेः कृत्स्ना॥ होममात्रमाहवनी
यमिच्छंति॥ तस्मिंस्तस्मिन्नग्नाविसन्वो॥ सर्वप्रायश्चित्तं तु आहवनीय एव॥ एतदन्यथा वेदग्निर्लौ
किको भवति॥ एवं सर्वत्रोत्पन्नेषु॥ आधानमध्ये गार्हपत्याधानार्थं मथनमारभ्य पूर्णाहुत्यंतं पस्य

Indira Gandhi National Centre for the Arts

प्राय॰ कस्याप्यग्नेरनुगमनेप्रयोगमुत्सृज्यकालांतरेआधानंकर्त्तव्यं॥उपावरोहान्तुरमितिकेचित्॥ननु
२ र्ध्वमिष्ट्यर्थमन्वाधाना त्यागनुगतोयदिगार्हपत्यो आहवनीयोवानुगच्छेदिष्ट्यादिनैमित्तिकंकर्त्तव्यं
॥अन्वाधानादूर्ध्वमन्याहितप्रायश्चित्तं॥सूर्योदयात्पूर्वं।गार्हपत्याधानंनकृतंचेत्प्रयोगंपरित्यज्य
कालांतरेआधानंकर्त्तव्यं।पूर्णाहुतेःप्राक्यस्यकस्यचिदंगलोपेपिप्रयोगोत्सर्गः॥प्रावाजपानेभस्वा
हेतिदाक्षिणाग्नौ॥यजुर्वेदविनिमित्तंहोमःकर्त्तव्यः।यदिऔपासनःसर्वोवाऔपासनैकदेशोवाब्र
ह्मौदनाग्निर्भवति॥तत्रयदाऔपासनःसर्वोब्रह्मौदनिकःस्थापितः।ब्रह्मौदनिकपाकात्पूर्वंसयद्य
नुगच्छेत्तदाश्रोत्रियागारादग्निमाहृत्ययादिष्टमात्रंप्रायश्चित्तंभवति॥यद्यौपासनांशश्चेत्पुनरौ राम॰
पासनैकदेशमाहृत्यनिधायसर्वप्रायश्चित्तहोमेव॥ब्रह्मौदनिकादूर्ध्वंयद्यनुगच्छेत्तदाअग्नेरुत्पत्ति
मुक्तेनैनप्रकारेणकृत्वासर्वप्रायश्चित्तंहुत्वापुनर्ब्रह्मौदनपाकादिवरदानांतंकर्त्तव्यं॥नायाश्चेत्सिमा ३

---

त्तंप्रायश्चित्तं॥यद्याहिताग्नेरग्निरपक्षायेदाशम्यापरासात्।यद्यग्नीनांमध्येयस्यकस्यचिदग्नेःकेन
चिदासीनेनप्रविद्धःशम्यापरावसध्वनिपततितितावत्पर्यन्तं॥अविधानेनाग्निर्गमनएवेदंप्रायश्चित्तं
कर्त्तव्यं।अपगतमग्निंपरिवाजपतिःकविरग्निर्हव्यान्यक्रमीत्।दधद्रत्नानिदाशुषेइतिसकृन्मंत्रेणाचि
श्वदक्षिणीकृत्यतमादायपस्मात्स्थानात्तस्मिन्नेवपुनःप्रक्षिपेत्।इदंतएकंपरऊतएकंतृतीयेनज्योति
षासंविशस्व॥संवेशनस्तनुवेचारुरेधिप्रियेदेवानांपरमेजनित्रइतिमंत्रेण॥आहवनीयसर्वप्रायश्चि
त्तं॥शम्यापरासादर्वागगमनेपरिक्रमणवर्ज्जं॥तूष्णींसंभृत्यसर्वप्रायश्चित्तं॥केचिच्छम्यापरासामर्या
देस्याहुः।तेषांमतेयत्रपरिक्रमणं।शक्यतेतत्राऽगमनमंत्रेणपरिक्रमणंसंभरणंचकर्त्तव्यं।अन्याहि
तेष्वग्निष्विदमेवप्रायश्चित्तंनवेतिरामांडारः॥पक्षसर्वप्रायश्चित्तमेव॥यदिपरस्तरांअपक्षायेत्तदा
पथिकृतेष्टिः॥यस्यसायंदुग्धंहविरार्त्तिमार्छेतीन्द्रायव्रीहीन्निर्वपसंघस्थानःस्यात्तच्छृतंकुर्यात्स्थित
रएंद्रःपुरोडाशस्यात्तस्यप्रातर्दोहेनसमवदायप्रचरेत्।यस्यसायंदुग्धंदह्नापहरणादिनाकेशादिना
शादिदूषणेनवाविनष्टंतदानीमेवोत्तरेणगार्हपत्याहवनीयोदर्भानास्तीर्यस्यापमग्निहोत्रहवणींअर्प

Indira Gandhi National
Centre for the Arts

श्राप॰ ४

वप्रयुज्य पुरतः पात्रीं प्रयुज्य इंद्राय जुष्टं निर्वपामीतीद्रयाजिनः। महेंद्रयेति महेंद्रयाजिनः॥ श्वोभूते पात्रसं
सादनकाले नैमित्तिकान्येकादशकपालानि प्रयुनक्ति॥ रात्रौ निरूप्तेषु व्रीहिष्वाग्नेयस्य निर्वापादिशतिप
घाते अथवा आग्नेयात्पूर्वं निर्वापो न रात्राविति रामांडारः॥ प्रोक्षणाद्युद्वासनांतमाग्नेयस्य पूर्वमुपचा
रं कृत्वा ततो नैमित्तिकस्य करोति॥ ऐंद्रस्य तु कुंभीमभिघारणं उद्वासनोत्तरं सान्नाय्यधर्माः॥ अस्य पुरो
डाशस्य सन्नाभिमर्शनादयः। संस्कारा दधिवत्क्रियेरन्। प्रचरणकाले आग्नेयेन चर्वर्थे। दधिस्थाने पु
रोडाशवदवदाय प्रातर्दोहेन सह स्रुच्युरवेनैव प्रचारः॥ श्रालणतर्पणांतं कृत्वा ततः प्रणयनादि पुन
रित्याच अपि वा तस्मिन्नेव तंत्रे प्रधानेज्यां कृत्वा तदेव वत्सापाकरणाद्या वर्जयंति॥ तेन चेष्टाशेषप्रधा
नानंतरं तंत्रेणेति॥ तदेतदेव प्रातर्दोह आर्त्तिगते प्रायश्चित्तैः। सायंदोहेनास्य समवदाय प्रचरेत्। प्रातर्दो
हविनाशे इंद्राय महेंद्राय वा एकादशकपालानि प्रयुज्य संप्रश्य प्रोक्षणकाले प्रोक्ष्य वानस्पत्यासिद्द राम॰
क्षापत्ते स्याग्निहोत्रहवण्यादानादि व्रीहीन्निरूप्य पुरोडाशं कृत्वा उद्वासनादूर्ध्वमासन्नाभिमर्शनादिप
योधर्मा दध्नास हावदाय स्रुच्युरवेन प्रचारः पुनरिज्या च॥ यदि सायंदोहे विनष्टे तदर्थं पुरोडाशे कृते। प्रात ४
दोहस्यापि विनाशस्तस्यापि पूर्ववत्पुरोडाशं कृत्वा दोहार्थयोः पुरोडाशयोः सह प्रचारः पुनरिज्या च॥

यस्याग्नौ दोहावाग्निमार्च्छेयातामाग्नेयमष्टाकपालं निर्वपेदैंद्रं पंचशरावमोदनमग्निं पुरोडाशेन यजेतैंद्रं पं
चशरावेणाथ पंचशरावेण वा नेदवते यजेताथो हविषं वसानपाकृत्योपवसेत्। दोहद्वयस्य युगप
द्विनाशे उत्तरपक्षमाश्रित्य प्रयोगो लिख्यते॥ चरुस्थालीनिर्वापार्थं शरावं च प्रयुज्य। शरावस्याग्निहो
त्रहवण्या सह कृत्स्नामादानतपने कर्तव्ये। वानस्पत्यादिशरावेण त्रिणि हविस्तु कुंभीमिंद्राय जुष्टं निर्वपामी
तिनिर्वपति॥ महेंद्रायेति महेंद्र~~निर्वप॥ महेंद्राय~~ेति याजिनः। उद्वासनात्पूर्वं चरुधर्माः॥ ऊर्ध्वं दोहधर्माः॥
प्रचरणकाले अग्नेराग्नेयपुरोडाशादवद्यतः पंचशरावशरोः सकाशावदायाऽभिघार्य नात्र पंचश
रावहविः प्रत्यभिघार्याग्नेयं प्रचर्य आग्नेयीरहं देवयज्ययान्नादं इंद्रियावी भूयासं॥ पुनः पंचशरा
वैंद्रं केशादिं महेंद्र यथाचारं जपेत्॥ इंद्रस्याहं देवयज्ययेंद्रियावी भूयासं॥ जेमानं महिमानमिति महें
द्रयाजिनः॥ इत्यनुमंत्रणविशेषः। समाप्य पुनरिज्या च॥१॥ ॥यस्य व्रतेऽहन्यत्नी नालंभुका स्यात्तामप
रुध्य यजेत जघनेन वेदिमंतर्वेदि वा दक्षिणं शुल्बं सन्नहनं स्तृणीयात्। यदि यजमानस्य पत्नी दर्शपूर्णमा
सादौ संकल्पोत्तरं संकल्पात्पूर्वं वा॥ रजस्वला यां जातायां तां सह कृत्वा यजेत संकल्पात्पूर्वमपि स्यात्स्वेतिके

Indira Gandhi National
Centre for the Arts

संकल्पात्पूर्वं रजस्वलायां जातायां नयागः। कालांत
प्राय० चित्॥ मुख्यकालत्वादेवं सूतिकायां व्यापृतायां च॥ संकल्पात्पूर्वं रजस्वलायां जातायां न यागः। कालांतरे दिवोरि
५ रे प्रायश्चित्तं कृत्वा यागः इति केचित्॥ पत्नीवर्जं सं प्रवृत्ति॥ सन्नहनकाले जप नेनवेदिमं तर्वेदि योरि
कृ शुल्बं सन्नहन दस्तरणीयात्॥ अग्ने गृहपत इत्यादि यजमान पातिष्ठत॥ इंद्राणी वा पुत्रकामे आत्या
वेक्षणं तेजोसि वेदं पत्नीप्रदापयेत्यादि समापुष्पा पुष्टिमती त्वेतेषां पत्नीकर्मणां निवृत्तिः॥ अन्यवास
ने त्तित एव यजमानः पत्नीकर्म कुर्यादिति त्रिकांडमंडनं दृष्ट्वा व्यवस्थापितं भवति। तत स्त्रिरात्रातीतां
पत्नीमनुगमनार्थमुपह्वयेत्॥ अमहमस्मि सा त्वं द्यौरहं पृथिवी त्वं सामाहम् ऋक्तावेदिसंभवा वसह
रेतो दधावहै पुंसे पुत्राय वेत्तवे रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय॥ ततो विष्णुर्योनिमिति त्रयोदशभि
र्ऋग्भिरभिमंत्र्य हिंकृत्य स्त्रियमुपेयात्॥ बहुपत्नीकस्य पत्नीकर्माणि रजस्वलाव्यतिरिक्ताभिः कर्तव्या राम०
नि॥ वसंतप्रथमासादि नियतकालानामपरुध्येव यागः कर्तव्यः। तथा पिंडपितृयज्ञ श्रौतिरुद्रदत्तः। नेतिरा
मांडारः॥ पिंडपितृयज्ञस्य गौणकालोस्तीति त्रिकांडमंडनः॥ आधानसंकल्पादारभ्य दक्षिणादानांत ५
र्वं यदि पत्नी रजस्वला तदा तं प्रयोगं परित्यज्य कालांतरे आधानं कर्तव्यं॥ तावत्पर्यंतं ब्रह्मौदनाग्निधा

दक्षिणादानोत्तरं ने पदोषः॥ आधाने प्रवृत्ते शाखाद्याशो
रणं सर्वाधानपक्षे नित्यपरिचर्यातत्रैव भवति॥ दक्षिणादानोत्तरं नेपदोषः॥ आधाने प्रवृत्ते विनष्टे ष्ट्यर्थसारस्व
वं न भवति॥ अन्वारंभणीयायाः आरंभात्पूर्वं तु रजस्वलायां जातायां कालांतरे विनष्टे ष्ट्यर्थसारस्व
तहोमान्वारंभणीयां च कृत्वा विमृष्टेष्टिं कृत्वा पुनः स्वारस्वत होमान्वारंभणीयासहिता पौर्णमासी
कर्तव्या॥ अपिवा विमृष्टेष्ट्यर्थं नान्वारंभणीया आरंभात्पूर्वं चेदपरुध्येसा पौर्णमासी कर्तव्या॥ आ
ग्निहोत्रहोमारंभे तु दशहोतारं कृत्वा। प्राचीनः शौर्यं। आशौचादिना कालातिपत्तौ इदमेव प्रायश्चित्तं॥ अग्निहोत्रहोमारंभे तु दशहोतारं कृत्वा
पुत्रार्थं त्रीदनमग्निहोत्रं कर्तव्यं॥ ततस्त्रिरात्रांते सप्तहोतारं कृत्वा दशहोतारं प्रभृत्याग्निहोत्रारंभः। एवं पि
उपितृयज्ञे सप्तहोतारं कृत्वा रंभः। यदि रजस्वला गार्हपत्यादीनामन्यतमं स्पृशति अग्नीन्परित्यज्य
पुनराधेयं कृत्वा शुचयइति इष्टिः कर्तव्या॥ यत्र यत्र होमार्थमाहवनीयाद्याग्निप्रणीतास्तत्र तत्र होमात्पूर्वं र
जस्वला संस्पृशति तदा तं परित्यज्यान्यं प्रणीय शुचीष्टिः॥ दर्शपूर्णमासारंभात्पुरस्ताद्रजस्वला चेद्
र्न्यच्चिन्महेष्टिं कृत्वा गामिपौर्णमास्यारंभः॥ तथा पिंडपितृयज्ञाग्रयणपश्वाद्यारंभात्पूर्वं रजस्वला
चेत्कालांतरे आरंभेत द्वितीये प्रायश्चित्तं कृत्वा नेष्टुं तिति स्थितं। प्रथमदर्शारंभात्प्राक् रजस्वलात्वे कालात

यांविच्छिन्नेष्टिंकृत्वागौणकालेपिदर्शानुष्ठानं।उभयोःप्रक्रांतत्वात्केचिद्विच्छिन्नेष्टिंविधायपथिकृदैष्ट्या
नरोकुर्वंतिइत्यंतेरामाडारः॥श्रौतेकर्मणिचतुर्थ्येहनिशुद्ध्यतिस्यात्तपंचमेहनि॥इतिरजस्वलाप्रकर
णं॥ ॥यस्याग्निहोत्रंसान्नाय्यंवाविष्यंदेतोदकुं·परेत्यवल्मीकवपामुद्धृत्यप्रजापतेनत्वदेतानी
तिप्रजापत्यायर्चावल्मीकवपायामवनीयभूरित्युपस्थायान्यांदुग्ध्वापुनर्जुहुयात्।यदिसान्ना
य्यमन्यदोगमयेत्॥यदिसान्नाय्यार्थंपयःअग्निहोत्रार्थंपयोयवाग्वादिस्त्रिष्यमाण।मग्निसं
योगाकृतंमग्निंभूमिंवाप्राप्नोतितदापात्रस्थंहविशदायोदगालावतीकस्यबिलमपावृत्यापउपस्पृ
श्याप्रजापतेनत्वदेतानीतिऋचास्वाहाकारवर्जंतस्मिंनवनीयभूरित्युपतिष्ठते।नात्रमनसा।तन्नहवि
रग्निहोत्रंचेत्पुनरग्निहोत्रधर्मेणयवाग्वादिदोहधर्मेणान्यांदुग्ध्वाजुहुयादितिपयसि।सान्नाय्यंचेल्लौ
किकंपयआहृत्यमंत्रेणकुंभीमधिश्रित्यप्रतितप्यशरंवापवित्रंचाभ्याधायदेवस्त्वासवितापुनाति राम·
तिमंत्रेणकुंभ्यामासिंच्यसंपच्यधर्मतावरीतिसंक्षालनंच्यानयति।दोहनलोपनिमित्तमंतरितप्रा
यश्चित्तंकुर्यात्॥आमिक्षायांतुसान्नाय्यप्रायश्चित्तमितिभरद्वाजमतेनातत्रसर्वप्रायश्चित्तमेव॥ ८

आमिक्षार्थंयदाविष्यंदेततदानतस्यसागः।तस्यामामिक्षांसंबंधात्।यदिकीटोवपद्येतमध्यमेनांत्य
मेनवापलाशपर्णेन।महीद्यौःपृथिवीचनइतिद्यावापृथिव्ययतःपरिधिनिनीयान्यांदुग्ध्वापुनर्जु
हुयाद्यदिसान्नाय्यमन्यदागमयते॥अग्निहोत्रेसान्नाय्येवायद्यमेध्यपिंडसंवर्त्तकःक्रिमिरवपद्ये
ततदामध्यमेनवांत्यमेनवापलाशपर्णेनमहीद्यौरित्यृचामध्यमपरिधिदेशस्यांःतन्निनीय।अग्नि
होत्रसान्नाय्यंपूर्ववदुत्पादयेत्।एवंतंडुलादिष्वपि।यस्याग्निहोत्रमववर्षेत्।यद्यग्निहोत्रहविष्षुपरि
वर्षबिंदवःपतंतिभूर्भुवःस्वरितिहोष्यन्जपतीत्यंतंकृत्वा।मित्रोजनान्कल्पयतिप्रजानन्मित्रोदा
धारपृथिवीमुतद्यां।मित्रःकृष्टीरनिमिषाभिचष्टेसत्यायहव्यंघृतवज्जुहोतस्वाहेतितेनैवहविषापू
र्वाहुतिंहुत्वामित्रोदेवता।स्रुगाज्यमार्जनाद्यंतंवेदिमार्जनांतंकृत्वापुनःप्रणयनादिमार्जनांतंसांगहोमंकुर्या
त्।केचित्तुष्टिरसोस्यपामुपस्पर्शनंकृत्वातद्यवाग्निषुदोहनादिपुनर्होमंकुर्वंति।उन्नयनशेषमेकीकृ
त्वापरयोर्होमः॥यदिपूर्वस्यामाहुत्यांहुतायामुत्तराहुतिःस्कंदेद्यदिवोत्तरस्यात्रवेलवनस्पतइति
वानस्पत्यर्चासमिधमाधायततएवतूष्णींहुत्वान्यांदुग्ध्वापुनर्जुहुयात्।यद्यग्निहोत्रेषुपूर्वाहुतौ

Indira Gandhi National
Centre for the Arts

प्राय. हुतायामुत्तराहुतिस्कंदेत्सर्वाहुते रूपर्युत्तराहुतिं जुहुयाज्जुहूयात्स्कंदमभिः तदायत्र वेस्रवनस्यात्ते देवानांउ
७ ध्यानामानि। तत्रस्थ्यानि गामय॥ इत्स्वंवावनस्पत्यैतिबुधा। तयासमिधमाधायस्कन्नशेषास्तुहोमु
त्तराहुतिं जुहोति प्रजापतिध्यानमुद्दिश्य त्यागश्च भवति। सर्वस्कन्ने चतुःपंचवोन्नीय तस्मिन्जुहोति॥ वृध्य
तेदोहनादि पुनर्होमः॥ ततः कर्मशेषं समापयेत्॥ एकदेशपतने नैतत्प्रायश्चित्तं॥ अनाहूतजपएवं
पूर्वाहुतिपक्षयेलेवप्रमादात् हस्तेनद्रव्यपतने सर्वप्रायश्चित्तं लेयावेतुरभ्युन्नीयोत्तराहुतिः॥ अस
र्वस्कन्ने अल्पावशेषेनैव होमः॥ पक्षस्य लोपः॥ नात्र पुनर्होम इति धर्मवृत्तौ। यदि पूर्वस्यामाहुत्यां
हुतायां आहवनीयोनुगच्छेत्। पूर्वाहुतौ हुतायां यद्याहवनीयोनुगच्छेत्। तदा यस्मात्काष्ठादग्निरंतनंउ
पशांतिः सास्मिन् शाकलं तत्तराहुतिमग्निर्होतेदारावग्निस्वाहेति मंत्रस्य मध्ये जुहोति न मंत्रांते॥ अग्न राम.
यद्दं॥ यद्यनुगतशाकलो न ज्ञातः तदा हिरण्यं निधाय। पूर्ववज्जुहोति॥ स्रुवक्षतितपनाग्निसमिंधनं परि
समूहनपरिषेचनानां निवृत्तिः॥ सप्तसप्तिभ्यश्चैस्ते स्रुदृशस्यापिकेचिदुदृशः कुर्वति। गार्हपत्यदक्षिणाग्न्यो
:कर्मसमाप्तिः॥ यदि पुरा प्रयाजेभ्यो बहिः परिध्यंगारः स्कंदेत्तं स्रुवस्य बुध्नेनाभिनिदध्यात्। प्रयाजार्थं ७

स्रुग्दानात्सर्वं परिधि परिदानादूर्ध्वं परिधिभ्यो बहिर्यद्यंगारः स्कंदेत्सर्वस्यां दिशि परिध्यग्राद्बहिस्कंदे
तं स्रुवमूलेन पीडयेत्। मा तमो मा यज्ञस्तमन्मा यजमानस्तमत्॥ नमस्ते अस्त्वायते नमो रुद्रपरायते
नमो यत्र निषीदसि॥ अध्वर्युं मा हिंसीर्यजमानं मा हिंसीरिति। तमादाय। अहं यज्ञं दधे निर्ऋतेरु
पस्थात्तं देवेभ्यः परिददामीति ततः स्तमग्नौ प्रक्षिपति सहस्रशृंगो वृषभो जातवेदा स्तोमपृष्ठो घृतवा
न्सुप्रतीकः। मा नो हासीन्मत्स्थितो नेत्वा जहाम गोपोषं नो वीरपोषं च यच्छत्वनेगोनां रंतृ स्त्रीप्रतितप्य
सहस्रशृंग इत्यनया होमो वा यदि दक्षिणस्यां ब्रह्माणं मा हिंसीर्यज॰सीः॥ यदि पश्चाद्धोतारं॰सीः पत्नीमा
हिंसीर्यज॰सीः॥ यद्युत्तरतः। आग्नीध्रं मा हिंसीः पशून्मा सीर्यज॰सीः॥ इति प्रतिदिशं पूर्वमंत्रस्य शेषः॥
अभ्यस्तमानं॥ यदि कालसंनिकर्षेऽग्निर्मथ्यमानो न जायेत यत्रान्यं पश्यन्नत आहृत्य जुहुयाद्दृष्टावर
मालः पुनर्मथयेत्। अग्निहोत्रस्य प्रणयनकाले अकाले वा अनुगतोऽग्निः यद्यापततमध्ये कृष्णा चेत
दा तैलादिप्रक्षेपेणाग्निरुत्पत्तिं कुर्यात्। यदि नोष्मा तदा अनुगतं गार्हपत्यं समुत्पादयिष्यामीति संकल्प्यात
तोनुगतभस्म। नात्रारणी संस्पृश्य मंथयेत्। ततो गार्हपत्यायतने निधायाहवनीयं प्रणीय तपस्व तेश्चिते

Indira Gandhi National
Centre for the Arts

८ स्थाने मित्राद्याहुतीर्हुत्वाऽग्निं परिसृज्योपस्थानादि कुर्यात् ॥ मित्रादिहोमः । तत्र गृह्यास्तमये सर्वानुगतिरेव ॥ यदि कालसन्निकर्षेऽग्निर्मथ्यमानो न जायेत तदा लौकिकाग्निमानीयायतने निधायोपस्थानादि मार्जनान्तं होमं कृत्वा लौकिकाग्निं परिसृज्य पुनरग्निं मथित्वा गार्हपत्यायतने निधायाहवनीयं प्रणीय वक्ष्यमाणमित्रादिहोमः ॥ यदि पुनर्मथ्यमानोपि आगामिहोमकालपर्यंतं न जायेत तदापि लौकिकाग्नावग्निहोत्रं हुत्वा मंथनादि पूर्ववत्कर्तव्यमिति केचिदाहुः ॥ नात्र सर्वानुगतिरिति वृत्तिकारः ॥ विहृतेष्वग्निषु अनुगतेषु आह योऽस्तमुदयं वा गच्छेत्तदाऽग्न्याधेयं ॥ अविहृतेषु तु यावज्जन्मतावन्मंथने तेनानुद्धरणप्रायश्चित्तं कृत्वा कालातिपत्तिश्चेत्तस्य प्रायश्चित्तं कृत्वा होमः ॥ मात्र राम० लौकिकाग्निस्थापनमिति ॥ एवं रुद्रदत्तश्च ॥ प्रयाणे द्वौ आरण्योः समारूढोऽग्निः प्रयाणकाले मथ्यमानो न जायेत तदापि लौकिकाग्न्याहरणादि पूर्ववत् ॥ अजस्रपक्षे तु अग्निहोत्रकाले योऽग्निरनुगतो मथ्यमानो न जायेत तस्मिंल्लौकिकं निधाय होमं कृत्वा मंथनमनुगतहोमः ॥ अथ नैमित्तिकेष्टिः ॥ यस्य ८ यजमानस्य शौतेयः संततं म्रियन्ते तदा क्षामवतीष्टिः कर्तव्या यस्याहिताग्नेरग्नयोऽन्यैः श्रौतैर्वा

लौकिकाग्निभिः संसृज्येरन् तदा तमग्निमरण्योः समारोह्य मथित्वोपावरोह्याग्नये विविचयेष्टिः कर्तव्या । यदि गार्हपत्याहवनीयावन्योन्यं संसृज्येयातां तदा संसृष्टं पूर्ववन्मथित्वोपावरोह्यायतने स्थितस्यापि समारोपणं कृत्वा यतनस्थमुद्धृत्य मथित्वायतने निधायाग्नेर्विविचयेष्टिः कर्तव्या । यदि गार्हपत्यदक्षिणाग्नी दक्षिणाग्न्याहवनीयौ वा अन्योन्यं संसृज्येयातां पूर्ववन्मथित्वाग्नये वीतये इष्टिः ॥ यदि वनदाहवह्निना गृहदाहवह्निना वा श्रौताग्नीनां संसर्गः ॥ मंथनादि अग्नये संकुसुकायेष्टिः ॥ यद्यग्नीन्वह्निना पृथक्करणं पूर्ववत् । ततोऽग्नये क्षामवत इष्टिः ॥ यद्यग्निहोत्रस्थालीं भित्वा पय आदित्येनं हविरभिमंत्रयते ॥ गर्तं स्ववनमगादमकरग्निरिंद्रस्त्वष्टा बृहस्पतिः । पृथिव्यामवतेश्वोते तन्नाभिप्राप्नोति निर्ऋतिं पराचैरिति । ततोऽग्निहोत्रस्थाली कार्यक्षमा वेत्सवनिकद्रव्ये विश्वं द्राणं समनद्रुतिसंदध्यात् । ततोऽग्निहोत्रस्कन्नप्रायश्चित्तं । यदि स्थाली कार्यक्षमा न भवति । तदा स्थालीमप्सु प्रक्षिप्यान्यां स्थालीमाहृत्य दोहनादि कुर्यात् । आग्नेयपथिकृतं पुरोडाशमष्टाकपालं निर्वपेद्या कार्यो येषां विवाहे तस्य पत्नी घृतेयस्य यजेत ततं दर्शपूर्णमासयाजीत्युक्तेः समानतंत्रं वा मुख्यः

Indira Gandhi National
Centre for the Arts

प्राय० तदेतामिष्टिं निर्वपति। स एवासावाग्नेयोऽष्टाकपालः पौर्णमास्यां यो मावास्यायां तमग्नये पथिकृते
९ कुर्याच्चैव पुनः पंथानमवैति न यज्ञं विच्छिनत्तीति विज्ञायते संयाज्ये एव पाथिकृती स्यातामित्यपरं।
पः प्रवृत्तदर्शपूर्णमासो यक्ष्यमाणो अमावास्यां पौर्णमासीं वा स्वकाले न कुर्यात् स आगामिपर्वणो
र्वाक् पथिकृतमितीष्टिं कृत्वा अनडुहं दक्षिणां पश्चाद्वैश्वानरीं कृत्वान्वाहार्यं दक्षिणां नंतं रातिपन्ने द
र्शपूर्णमासं वा कुर्यात्॥ अनयोः समानतंत्रता। अथवागामिपर्वणोरतिपन्ने दर्शपूर्णमासं पाथि
कृन्मुखं कुर्यात्। पथिकृन्मुखं वा पूर्णमास्येन यक्ष्ये। एवं दर्शे। इति संकल्प्य। आग्नये पथिकृते जुष्टं नि
र्वपामीति पूर्ववन्निरूप्य तताग्न्यादीनां निर्वापः॥ अग्ने पथिकृद्धव्यं रक्षस्व। आग्नये पथिकृते वो जुष्टं
प्रोक्षा० आग्नये पथिकृते जुष्टमधि०। एवं संवापः॥ आग्नये पथिकृतेऽनुब्रूहि। अग्निं पथिकृतं यज। राम०
आग्नये पथिकृत इदं। अग्नेः पथिकृतोऽहं देवयज्ययान्नादः॥ एवमुज्जितिः॥ इदं मुख्यकालातिपन्न
प्रायश्चित्तं॥ गौणकालेप्यतिपन्ने एवमेव। तत्र क्रियातिपन्नस्य उत्तरेज्याधिकारार्थं प्रायश्चि
त्तमेव। तत्र पौर्णमासातिपत्तिनिमित्तं दर्शातिपत्तिनिमित्तं वा दर्शपूर्णमासातिपत्तिनिमित्तं वा पथिकृ ९

तदिष्टिं करिष्ये। इष्टिं समाप्य ततो वैश्वानरेष्टिं करिष्ये इति इष्टिद्वयं कृत्वोत्तरेज्याधिकारः। अनयोः समान
तंत्रता वा पथिकृतेष्टिं कृत्वोत्तरेज्याधिकार इत्याश्वलायनः। इष्टिद्वयासंभवे पूर्णाहुतिर्वा॥ अनेकदर्शपू
र्णमासातिपत्तिनिमित्तं पथिकृद्वैश्वानरेष्टिस्थाने पूर्णाहुतिं होष्यामि इत्यनेकातिपत्तौ संकल्पः। अग्नि
विहृत्य तस्मिन्नेवाग्नौ पूर्णाहुतिद्वयं कुर्यात्। प्रायश्चित्तं समाप्य वोत्तरेज्याधिकारः। नोत्तरेज्यासह तंत्रता
। एवं द्वयोर्बहूनामपि। बहुशब्देन इष्टित्रयालि। कालातिपत्तौ ऊर्ध्वकालातिपत्तिश्चेदन्वारंभणीयावर्त्त
व्या इति बौधायनः। अनेकातिपत्तौ विसर्गः। तत्र पुनराधानं कर्तव्यमिति केचित्। त्रिकाण्डमण्डनः। दर्शपूर्णमा
सयोः प्रक्रान्तयोः देवाग्न्यनुपाहूताविरोधात् स्वकाले कर्तुमशक्ययोः शान्तयोर्विरोधे निरातीतस्य च आग्ने
यस्य स्थाने ऽग्नये पथिकृते जुष्टं निर्वपामीति निरूप्य निर्वापादूर्ध्वं विरोधात् कालोतिपद्येत तदा स्वि
ष्टकृते कृताय ज्यानुकृते पाथिकृतीं कुर्यात्॥ नात्र कालातिपन्नप्रायश्चित्तं। प्रवृत्ताग्रयणस्य शरदस्यागा
मिन्याः शरदः पूर्वं पथिकृद्वैश्वानरी कालातिपत्तिनिमित्तं पथिकृद्वैश्वानरेष्टिस्थाने पूर्णाहुतिं होष्यामि॥
इति संकल्प्य। ततोऽग्निं विहृत्य पूर्णाहुतिं कृत्वा आग्रयणसंकल्पः। आग्नेयस्य जीर्णेनेव व्रीहिभिः। आधा
Indira Gandhi National
Centre for the Arts

श्रय० मादर्शपूर्णमासौ देवान्मानुषाद्वा यदि स्वकाले नारभ्येयातां तदा गौणेति विरोधे आगामिन्यां पौर्ण
१० मास्यां विप्रकृष्टे। प्रथमे सारस्वतहोमानन्वारंभणीयां कृत्वा चतुर्होतारं हुत्वा विप्रकृष्टेष्टिं कृत्वा पुनर्दर्शपूर्ण
मासार्थे सारस्वतहोमानन्वारंभणीयां च कृत्वा चतुर्होतारं हुत्वा पौर्णमासेन यजेत। तत्र यामो द्वादशस्व।
अन्वारंभणीयाविकृतौ न स्यादित्यस्मिन्पक्षे अन्वारब्धे दर्शपूर्णमासयोः प्रथमं विप्रकृष्टेष्टिरेवानवि
न्नस्यार्थमन्वारंभणीयेति दैवं ज्वरादि मानुषं राजचोरादि अस्मादिप्रतिबंधे शुद्धकालसमागमेन
विप्रकृष्टेष्टिः। एवं मलमासादिप्रतिबंधेऽपि कृतायामन्वारंभणीयां पौर्णमासौ ति यद्यतन तदा विप्रकृष्ट
ष्टिचतुर्होतारौ वा आगामिपौर्णमास्यां कर्तव्यौ। एवं प्रथमे दर्शे व्यतिपन्ने। तथैवाग्रयणे व्यतिपन्ने चिं
उपनिनयज्ञकर्मलोपकर्मणि वा मिति पालिप्रक्षालनात् सर्वे समिष्टयजुष्यः पूर्वमिति केचित्। दशार्थ ... तदा दशहोतारं हुत्वा उप राम०
माहवनीये सप्तहोतारं जुहुयात्॥ अग्निहोत्रारंभे काले यदि न क्रियते तदा दशहोतारं हुत्वा
र्थमाहवनीयमग्निहोत्रे हुत्वा ऽपरेद्युः पराह्णे स्वकाले अहोरात्रोऽनतरित निमित्तं सप्तहोतारं सानहं हुत्वा सर्वप्रायश्चित्तं च हुत्वाग्निं १०
होष्यामीति संकल्पः अग्निविहरणे चतुर्गृहीतेन सप्तहोतारं

परित्यज्य पुनः प्रणीय दशहोतारं हुत्वा सायमग्निहोत्रारंभः। आरब्धाग्निहोत्रस्यापि लोपे
आगामिहोमकादिदमेव। मनोज्योतिरित्यग्निलोपनः। मंत्रस्तु तत्र चाखी एव। आरब्धचातुर्मा
स्ये श्रावरुणप्रघासाद्येष्वेव स्वगौणकालः। तत्र पथिकृद्वैश्वानरौ कृत्वा ऽतिपन्नो वैश्वदेवः
कर्तव्यः। पाथिकृन्मुखो वा तथा वरुणप्रघासाद्याश्चासाकमेधाः साकमेधश्चाशुनासीरीयकत्वाः
तु। अविधानेन नष्टवह्निः स्मृतिचोदितं चांद्रायणं कुर्यात्। ततोऽग्निनाधायततो लुप्तानामिष्टि
नां पाथिकृति वैश्वानरौ च कृत्वातिपन्नदर्शपौर्णमासौ वा कुर्यात्। तत्रानेकदर्शपौर्णमासाति
निमित्तमिति संकल्पः। नात्र पथिकृतोन्मुखो दर्शपूर्णमासः पूर्वप्रायश्चित्तेनैव नैकसिद्धिः॥
लुप्तानामग्निहोत्राणां पिंडपितृयज्ञानां च सप्तहोतारं जयादि पन्नं कुर्यात्॥ अथ विप्रकृष्टेष्टिः। दु
स्थायक्षे॥ अमावास्यं तंत्रं। पात्रप्रयोगकाले एकोनविंशतिकपालानि स्थालीं वसा न्याय्य पात्रे
वर्जमितराणि प्रयुणक्ति। निर्वापे आग्नेयं निरुप्यैंद्रं निरूप्य सोमं च सोमं च निर्वपति। अग्ने ह
व्यं रक्षस्वेंद्र हव्यं रक्षस्व सोम हव्यं रक्षस्व अग्नये वो जुष्टं प्रोक्षामींद्राय वो जुष्टं प्रोक्षामि सोमा

Indira Gandhi National
Centre for the Arts

आ०प० पवो०मितितंडु,लानांत्रेधाकृत्वा॥ यथाभागं व्यावर्त्तध्वं।द्विभागमेकीकृत्य पर्णो बेर्ये।दूरमानेः शिंद
११ स्यपेषणार्थो तू।अधिश्रयणकाले आग्नेयस्य सोम्यस्य चरुपोरुद्दीतारं दृप्रक्षिप्य ततोधिश्र
यति।तूष्णीं मुमुत्तरे योभिधारणं।प्रियेणेत्यासादनं।योनिः क० अपतन्निंद्रां०दती।इतीदस्याभिम
र्शनं।इंद्रस्याहं देवयज्यये द्रियाव्यन्नोदः।सोमस्यवृत्रहा॥ इष्टिः संतिष्ठते॥दर्शपूर्णमासे व्रत
लोपे व्रातपतेष्टिः कर्तव्या॥ मम भार्यायाश्च वा व्रत यनिमित्तेइष्ट्या यक्ष्यइतिसंकल्प्य॥ अग्नयेव्र
तपतये जुष्टं निर्वपामीतिपूर्वे निरूप्यलत आग्नेदीनीनिर्वापः।अग्ने व्रतपते हव्यं रक्षस्व।अग्नये
व्रतपतये वो जुष्टं प्रोक्षामि।एवं संवापः।इष्टिः संतिष्ठते॥ अथ व्रतेयहनियदि दुःस्वप्नाश्रुपातं कुर्या
तू॥ तदा आग्नेयेव्रतभृतेष्टिः कर्तव्या निमित्त मुद्दिश्य।अस्यापि पूर्ववत्समानतंत्रता कार्या। नाऽनंदा राम०
श्रुपातइदं निमित्तं॥ ॥अथ बोधायनेन समारूढाग्न्यारसमारूढाग्न्योऽरण्योरुपघातनि
मित्तेदि उपघातयोः॥प्रायश्चित्तमुच्यते।अमेध्यश्च चांडालरासभश्च इत्वायसपतितरजस्वला
निश्च॥इत्यष्टाभिस्पर्शेरण्योर्नाशः॥ अयोग्यतास्यादित्यर्थे तत्रामेध्यशब्देनमूत्रपुरीषादयोगृह्यंते। ११

मुपहतानीदारुमयाणां पात्राणामपि त्यागः अदेवलोप्याह मानुषास्थिशवं विष्ठारेतोमूत्रमेवेचास्वेदो
श्रुसूयिकाश्लेष्मा ऽमेध्यामेध्यमुच्यते।चांडालशब्देन सर्वप्रतिलोमः।रजस्वलाशब्देन सुतिकापएते
अथ
निमित्ते रूपततयाः समारूढाग्नावरण्योर्विनाशः। अन्ये अरणीआहृत्य पुनराधायेकर्तव्यं। अथ
बोधायनः।अथ यद्यरणीजीर्णे स्यातां तंतुभिर्मंथनेन वा समातनवे अन्ये आहृत्यामावास्याम्या
मुपाष्य श्वोभूते दर्शनेतस्मिं जीर्णे शकलीकृत्य गार्हपत्ये प्रक्षिप्य प्रज्वाल्य दक्षिणेनोत्तरारणीमाद
यसव्येनाधरारणीमुपर्यग्नौ धारयं जपत्सु इध्यस्याग्नेप्रविशस्वयोनिमन्यां देवज्यो वा देवजातवेदः॥
अरण्योरणीमनुसंक्रमस्वजीर्णां तनुमजीर्णयनिर्णुदस्वस्यथायं तयोर्हेलियइत्यरण्योरग्नीसमा
रोप्य मंथनस्यावृतागार्हपत्यं मथित्वा विहारं कल्पयित्वा गार्हपत्ये आज्यं विलाप्योत्पूयसक्चि चतुर्ग
हीतं गृहीत्वाहवनीये संततिर्जुहोति मनोज्योतिः।घ।तेनस्वाहेत्यथाग्नयेतनुमते पुरोडाशमष्टाकपालं
निर्वपति।शरावं दक्षिणां ददाति।सा प्रसिद्धेष्टिः संतिष्ठते।तत्र प्रयोगः॥ यद्यरणीजीर्णे स्यातां जंतुभि
मंथनेन वा कार्यास्मिन्जाता दग्धेनष्टेउपहते वा भवतः।तदा अत्र समाविस्तारा वा साध्यैः पूर्वारण्योसमं

Indira Gandhi National
Centre for the Arts

प्राय० तेर तु यमुक्ताग्न्युत्कलस्थलान्निक्षिते कार्योक्ष मेन वे अन्ये अरणी संपाद्या माना स्यायां प्रातरग्निहोत्र
१२ हुत्वा अग्न्यूढो हव्यवाहो• रामि• शांत• नवे। आयुर्मे• यजमाने इत्येताभ्यां मरणी आहृत्याग्न्यन्वा
धानादिकृत्वा पोष्य ग्नो मतेदर्शिन घ्रू जीर्ण अरणी शल्कली शकलीकृत्य गार्हपत्ये प्रक्षिप्य प्रज्वाल्य
नवे अरणी दक्षिणेनोत्तरणीं सव्येनाधरारणीमादाय। गार्हपत्यस्योपरि धारयन् जपति॥ उद्बुध्य
स्वाग्ने प्र विश स्वयोनिमिति सोत्रिमं त्र मुस्कायं तयोनिरितिमं त्रेण नवारण्योः समारोपणं इतः प्रथम
मितिमंथनं कृत्वा अग्ने सम्राडिस्येष निमं त्र्य सम्राडसी सुपसमिध्य। अग्निमंत्रेणोपसमिंधने मंत्रेण
कुर्यात्। गार्हपत्यायतनं गोपयेन्नानुलिप्यायतने ग्निं निधायाग्निद्वयं प्रणीय मनस्वतीं हुत्वा पुनः प्र
णीयतेनुमतीष्टिं कुर्यात्॥ एवमेव यदारणी जीर्णस्यात्तां निद्रा कुर्यात्। इति प्रायश्चित्तप्रदीपः॥ ॥ अथ
होमप्रकरणं॥ ॥ यदि हूयमानं स्कंदेत्तदभिमंत्रयते। यदद्य दुग्धं पृथिवीमसत्तं यदोषधीरत्यसरद्यदापः। पयो गृहेषु पयो अघ्नियासु पयो वत्सेषु पयो अस्तु तन्मयीति। ततः स्कन्नस्योपरि जलं क्षिपेत्। समुद्रं वः प्रहिणोमि स्वां योनिमपि गच्छत। अरिष्टाः प्रजया भूयास्मापरासेचि मत्पय। इति रामः १२

सर्वप्रायश्चित्तं च सर्वस्कंदने अन्यां दुग्ध्वा होमः कर्त्तव्यः। असर्वस्कंदने ने अवशिष्टेनैव होमः। दो
होत्तरमधिश्रयणात्प्राकू अग्निहोत्रं स्कंदेत्तदा स्कन्नमभिमंत्रयेत्। अस्कान्द्यौः पृथिवीमस्का
न्वृषभो युवा गाः। स्कन्नेमा विश्वा भुवना स्कन्नो यज्ञः प्रजनयतु। अस्कानजनि प्राजनि आस्कन्ना
ज्जायते वृषा। स्कन्नात्प्रजनिषीमहि। एतैर्मंत्रैः। उन्नेमयपृथिवीमिधीदं दिव्यं नमः। उक्ते दिव्यस्य
नोदेही शानो विसृजादृतिं। इति तस्योपर्युदकं प्रक्षिपेत्। यजमानपत्न्योरागमि होमकालो दनशनं वा
अग्निहोत्रस्कंन्ने सर्वत्र तत्त्रयं भवति। असर्वस्कन्ने शेषेणैव होमः। सर्वस्कन्ने तु पुनर्दोहः। अधिश्रयणे
न्नरमुभयनात्प्रागग्निहोत्रस्कंन्ने भिमर्शनादिकृत्वा शेषेणैव होमः। सर्वस्कन्ने तु तज्ज्ञातीयमसस्क
तद्द्रव्यमानीय स्थाल्यां निक्षेपः। यदि सकृदुन्नीतमसर्वस्कंदेत्तदा तस्योपरि द्वितीयाद्युन्नयनं कु
र्यात्। एवं द्वितीयतृतीययोः पुनरुन्नीय होमः। नात्राभिमर्शनादि। अथ चतुर्थमुन्नीतमसर्वस्कंदेद अ२
भिमर्शनादिकृत्वा स्थाल्यां शेषमवनीय पुनरुन्नीय होतव्यं। सर्वस्कंदे तज्ज्ञातीयद्रव्यमानीया सुवि
प्रक्षिप्य होमः। अथ पंचावत्तिनां तृतीयमुन्नयनान्तसमानं॥ यदि चतुर्थमुन्नीतमसर्वस्कंदेदभिम

Indira Gandhi National
Centre for the Arts

प्राय॰ र्शअभिमर्शनादि कृत्वा तस्योपरि पंचमुन्नयनं च होमः। पंचमोत्तरं सर्वस्कन्ने तज्जातीयद्रव्यस्य प्रक्षे
१२ पः। असर्वस्कन्ने तेनैव होमः। स्कन्नशेषहोमभक्षस्य नारदः। उद्धरणात्प्रागिदमेव प्रायश्चित्तं। सर्वतरि
क्षमन्वहीत्वारभ्य दुराहोत्रपरिसमाप्तिपर्यंतं। यदि श्रुवौ दृशा स्कंदेत्तदा स्कन्नप्रदेश उपविश्य। स्कन्नपु
नः श्रुवि गृहीत्वा तद्वेदिद्वादशधा दिश्वहोतव्यं मार्जनांते पुनर्धथ्यादानादि होमं कृत्वा धुरिरसी त्ययउपस्य
नः श्रुवि गृहीत्वात देवयाद्दक्षादिद्वहोतव्यं मार्जनांते पुनर्धथ्यादानादि होमं कृत्वा धृरिरसीत्ययउपस्य
र्शने कृते। जुह्वा स कृद्गृहीत्वा अवते हेडो वरुणनमोभिरवयज्ञेभिरीमहहविर्भिः। स्पृयंन्नस्मभ्यमस्करश्च
तारां जन्मेनाद्वं सिशिश्रथः कृतानि। उदुत्तमं वरुणपाशमस्मद्वाधमं विमध्यमं श्रथाय। अथा वयमा
दित्यव्रते तवानागसो अदितये स्याम स्वाहेति हुत्वा होमशेषं समापयेत्। अत्र वर्षवत्तस्मिन्नेव तंत्रे वृ
ष्यते हविरुत्पत्तिं कृत्वा होमः इति केचित्। अस्मिन्पक्षे स्थाल्यां स्थितपूर्वे यद्रव्यं द्वेचैकी कृत्य। परया राम॰
होमः कर्तव्यः। अस्मिन्पक्षे वारुणहोमो स्त्येव। यदि अभुव्यादौ अशक्यवदिशास्कंदेत्तदा स्कन्नाभिमर्शना
नादि कृत्वा होमद्रव्यस्य प्रतिनिधिं कृत्वा मार्जनांते पुनर्होमः पूर्ववत्। असर्वस्कंदने स्कन्नाभिमर्शना १२
दि कृत्वा शेषेण होमसमाप्तिः। पुनर्होमः पूर्ववत्। दशहोतुः समाप्त्यनंतरं शाकृतकुशसमीपनयनास्कंने

स्कन्नाभिमर्शनादि कृत्वा स्कन्नशिष्टेनैव होमः। नात्र स्कन्नस्यैव पुनर्ग्रहणं। सर्वस्कंदने अभिमर्शनादि कृत्वा
असंस्कृतमन्यद्रव्यं क्षिप्त्वा होमः कर्तव्यः। यदि दर्शेषु साद्यमानं स्कंदेत्तदा ससर्वस्कन्ने स्कन्नाभिमर्शनादि
कृत्वा स्रुक्समीपस्थालीमाहृत्य वनुपंचवापथाधिकारमुन्नीय होमं समापयेत्। असर्वस्कन्ने स्कन्नाभि
मर्शनं कृत्वा श्रुचि अन्यत्सजी। तीयद्रव्यस्य प्रक्षेपः। दर्शे पुरस्थापितपूर्वाहुतः पूर्वस्कन्ने अभिमर्शनादि
ति कृत्वा स्कन्नशिष्टेन होमः। स्रुगादारभ्य होमस्सर्वस्कंदे यदि तत्र केशिवीकारानिस्यत्वेन पुनर्होममिच्छति
रुद्रदत्तस्तु विकल्पेन मिच्छतिं यदाग्नियतेन तदा पर्ववत्कर्तव्यः॥ सायंहोमस्सूर्यो ज्योतिरिति प्रमादान्मंत्रः प
ठितस्याग्निश्च कृतः स्तदा स्कन्नप्रायश्चित्तमेव। एवं प्रातः। सर्वत्र स्रुचमात्रादून स्कंदने अंगुष्ठपर्वमात्रादू
न स्कंदने च न स्कन्नप्रायश्चित्तं। सर्वप्रायश्चित्तमेव। स्थाल्या स्कन्ने अपर होमार्थनोत्पत्तिः। दिव्यावाएतम
ग्निहोत्रं शिशिरा भवतिसमोप्यासुमिति ब्रूयात्। यस्याग्निहोत्रं पच्यमानं मग्निसंयो
गाच्छिद्विप्चिरशब्दं करोति तद्यजमानस्यानर्थ सूचकं तच्चैव तत्प्रायश्चित्तं। होमकर्ता समोपपाप्मानमिति
ब्रूयात्। यस्याग्निहोत्रेधिश्रितमीतराग्नीधावन्ति हे यस्याः समाप्यवेदं विष्णुर्विचक्रम इति वैकृत्यकावाहव
Indira Gandhi National Centre for the Arts

प्राय०

१४ नीयाधानं स्येनुद्धृतस्तयैव भस्मना पुनः पदं सलोपयेत् । उद्वासनादूर्ध्वं स्नेतु स्मार्त्तमेव शुद्धिः ॥ अथ दक्षि
णाग्निरनुगमनप्रायश्चित्तं हविरादनात्पूर्वं यदि दक्षिणाग्निरनुगच्छेत्तदा ऽनुगतं दक्षिणाग्निमुत्पादयि
ष्यामि । इदं संकल्प्य एतं प्रविशानिद्रति मंत्रेण गार्हपत्यादन्यं प्रणीयाहवनीये सर्वप्रायश्चित्तं वा यदि साय
मग्निहोत्रकालोतिपद्येन दोषावस्तोः नमस्यानिति कालसमापतनीयं होमं हुत्वाग्निस्यमग्निहोत्रमुप
सायातमितार प्राणनाह्वा समन्यहुत्वा भूर्भुवः सुवरित्युपतिष्ठेति । सर्पानवनाडीका होमकालः तत्राति
पत्तौ । आज्येन दोषावस्तः नमस्याहरति जुहोति अग्निर्देवतातनो भूर्भुवः सुवरिति होष्यजपांतं कृत्वा पव
ष्ठासमनुछुसं नासितो छुस्य । अग्निर्ज्योतिरिति हुत्वा दृष्यं तेन भूर्भुवः सुवरित्युपस्थायत तो मार्जनां
तेहोमशेषं समापयेत् । अथानुद्धरणप्रायश्चित्तं वैकल्पिकं । अथैकषां पश्याग्निमनुद्धृतं सूर्योभि राम०
निम्रोचेदभ्युदियाद्वा । अग्निहोत्रहोमार्थं वाग्निं प्रणीयाग्नावनुद्धृते सति सूर्याभिम्रोकनिमित्तं मनो
ज्योतिः त्रयस्त्रिंशादिति द्वाभ्यां चतुर्गृहीतं होष्यामि । अग्नावनुद्धृते सति सूर्याभ्युदयमिति प्रातः ॥
इति संकल्प्य तस्मिन्नग्नौ । मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञं समिमं दधातु । या इष्टा उषसो निम्रुच १४

श्च ताः संदधामि हविषा घृतेन स्वाहा । इति चतुर्गृहीतं जुहोति । मनसे ज्योतिर । पुनश्चतुर्गृहीत्वा । त्रयस्त्रि
ंशत्तंतवो ये वितत्निरे य इमं यज्ञं स्वधया ददन्ते तेषां छिन्नं प्रत्येतद्दधामि स्वाहा घर्मो देवां अप्य
तु स्वाहा । घर्मायेदं । सर्वप्रायश्चित्तं हुत्वा । ततद्विधा हरणा होमसमाप्तिः ॥ सायंकाले यद्यनुद्धृत आ
हवनीयकालातिपन्नस्तदा । अनुद्धृतप्रायश्चित्तं पूर्वोक्तसायं कोतिप्रतिप्रायश्चित्तं च कृत्वा होमं कुर्यात्
। प्रातरनुद्धृत आहवनीयकालातिपन्नस्तदा अनुद्धरणप्रायश्चित्तं कृत्वा कालातिपत्तिनिमित्तं आ
श्वलायनोक्तं प्रायश्चित्तं कुर्यात् ॥ मनोज्योति॰ मवि॰ या इ॰ उपसो या अति छाः स्ताः संतनोमि॰ चतुर्गृ
हीतं हुत्वा होमं कुर्यात् । यस्याग्निहोत्रं विच्छिद्येत द्व्यहं त्र्यहं चतुरहं वा । अग्निहोत्रहोमत्रयलोपनिमि
त्तं सप्तहोतैव प्रायश्चित्तं । चतुर्थहोमकालादारभ्य प्रागष्टमाद्धोमकालात्तंतुमती इष्टिः । अष्टमहोमकाला
त्पूर्वमाश्वलायनोक्तं मनस्वतिर्वा । अष्टमाद्धोमकालादूर्ध्वमग्न्याधेयं कर्त्तव्यं । धार्यमाणेष्वग्निष्वनुग
मने तस्य चोदितप्रायश्चित्तं मकृत्वा होमं कुर्यात् । तदा अष्टमाद्धोमकालात्पूर्वं स्मरतं चेद्यथाशास्त्रं त
स्य तस्योत्पत्तिं कृत्वा होमं कालोपप्रायश्चित्तं च कुर्यात् । अष्टमाद्धोमकालादूर्ध्वं स्मरतं चेत्तदा पुनराधानमेवा

Indira Gandhi National
Centre for the Arts

प्राय० नुद्धृतोग्निरुदयास्तमये गार्हपत्यानुगमने सर्वानुगतिनिमित्तं पुनराधानमेव। गार्हपत्यस्याऽन्यथा त्व
१५ नावपि एकस्मिन्होमकाले नीते उभयोरनुगतिनिमित्तं पुनराधानं कर्त्तव्यं। उदयास्तमयात्पूर्वं स्मर्तं चे
द्यथाशास्त्रं तस्योत्पत्तिः। अजस्रपक्षे नैरादृविधा प्रायश्चित्तेष्टीनास्ति नैतस्यै देवतायै पूर्णाहुतिं जुहु
याद्द्वादशगृहीतेनाऽष्टगृहीतेन चतुर्गृहीतेन स्रुवेण पूर्णाहुतिं वा॥८॥ यस्याहवनीयमनुद्धाते गार्हपत्य
उद्धायेदाहवनीयमुद्धास्य गार्हपत्यं मंथेदितः प्रथमं जज्ञे अग्निरित्येतस्या यद्याहवनीये विद्यमाने गा
र्हपत्यानुगच्छेत्। तदानुगतं गार्हपत्यमुत्पादयिष्यामि। दक्षिणाग्न्याहवनीयं चानुगमय्या गार्हपत्यस्य
भस्मनारणी संस्पृश्य मंथनं कुर्यात्। इतः प्रथमं जज्ञे अग्निः स्वाद्योनेरधिजातवेदाः। स गायत्र्या त्रिष्टु
भाजगत्या देवेभ्यो हव्यं वहतु प्रजानन्। इति मंत्रेण। बलवति जाते अग्ने संम्राडिषे राये रमस्व सहसे द्युम्ना
योर्जेपत्याय। इत्यभिमंत्र्य। संम्राडसि विराडसि सारस्वतौ त्वोत्सौ समिंधातामन्नादं त्वान्नपत्याय। इत्युप राम०
मिध्य ततो गार्हपत्यायतने निधाय। अत्राग्निरुषसामग्रमख्यदित्यन्यं प्रणीय एवं प्रविशानीति दक्षिणा
ग्नौ॥ अथ मित्रादिहोमः॥ मित्राय स्वाहा। मित्रायेदं। वरुणाय स्वाहा। वरुणायेदं। अग्नये स्वाहा। अग्नय इ १५

दं। अग्नये व्रतपतये स्वाहा। अग्नये व्रतपतय इ०। अग्नये तपस्वते जनद्वते पावकवते स्वाहा। अग्नये
तपस्वते जनद्वते पावकवत इदं। अग्नये शुचये स्वाहा। अग्नये शुचय इदं। अग्नये ज्योतिष्मते स्वाहा।
अग्नये ज्योतिष्मत इदं। सूर्याय स्वाहा। सूर्यायेदं। भूः स्वाहा। अग्न०। भुवः स्वाहा। वा०। सुवः स्वाहा। सू
०। भूर्भुवः स्वः स्वाहा। प्र०। ततः प्राकृतं कर्म समापयेत्। प्रधानहोमात्परमप्येतदेव प्रायश्चित्तं। एवम
न्यत्रापि। प्रणीत आहवनीये गार्हपत्येऽनुगते। एतदेव प्रायश्चित्तं। अस्य प्रायश्चित्तस्य प्रणयनविष
या उपदिश्यंते। इष्टिश्चपश्वर्थं प्रणीतेग्नौ अन्वाधानात्पूर्वं गार्हपत्योऽनुगच्छेद्दर्शहोमे चतुर्होतृपंचहो
तृषड्ढोतृसप्तहोत्रर्थं प्रणीते तेषां होमात्पूर्वं गार्हपत्योऽनुगते सारस्वतहोमात्पूर्वं संभारयजुरर्थं प्रणीते
ग्नौ होमात्पूर्वं गार्हपत्योऽनुगते सायमग्निहोत्रार्थं प्रणीते प्रातर्होमकालात् गार्हपत्योऽनुगते सावित्रादिहो
मार्थं प्रणीते होमात्पूर्वं गार्हपत्योऽनुगते उद्वसानीयस्थाने पूर्णाहुत्यर्थं प्रणीते वा गार्गत्रिशबलहोमा
र्थं प्रणीते गार्हपत्य एवमेवं सर्वत्र होमार्थमाहवनीये प्रणीते गार्हपत्यायतनेनैतत्प्रायश्चित्तं। तस्य प्रा
श्चित्तांतरविधानात्। एतेषु सर्वेषु प्रणयननिमित्तेषु। यद्याहवनीयोऽनुगच्छेत्तदा तस्य भस्मना लौकिको

Indira Gandhi National
Centre for the Arts

प्राय॰ रणीसंस्पृश्य तूष्णीमथित्वा। आयतनेनिधाय मित्रादीनुहुत्वाऽपिवा मित्रादिस्थानेतपस्वतिपूर्ण
१६ हुतिंकुर्यात्। अजस्रपक्षेप्येतदेवदक्षिणाग्नेरस्तं तूष्णींप्रणयनं। आहवनीयेसर्वप्रायश्चित्तंच। अज
स्रपक्षेहोमकालेदक्षिणाग्न्येनुगतेयोनिरस्तं तूष्णींसुत्वाद्या। हवनीयेप्रायश्चित्तं। सर्वत्रमस्मसं
स्पृश्यकृत्वामंथितोग्निर्लौकिकोभवति। यत्रमंत्रेविनासमारोपणंकृतंचनावरोहणंमंत्रलौकिको
भवति। यजमानेग्रामांतरंगतेयजमानपरिक्रमेण: पत्नीत्वापद्यनीत्यामाहुहिनेयेषु॥ तदालौकि
का:संपद्येरन्। यजमानोग्निसमीपेवसतिपत्न्याअपिग्रामांतरेवासोबौधायनेनाक्त:॥ तस्माक्षमाश्रि
त्यपत्न्यांप्रोषितेयजमानेपत्न्यपिग्रामवास्तुनोबहिर्गतादोमकालीतिपन्ना:होमकालमध्येनागता राम॰
चेदग्नीनांलौकिकत्वंस्यात्। उदयास्तपयेअसंनिहितेअग्नीनालौकिकत्वमितिकेचित्। संनिहिते
यजमानेनदोष:। उभयो:संनिहितमितिमुख्य:पक्ष:। पत्नीबहुत्वेपिअसंतरस्यांदेशांतरगतायांमप्य
ग्नीनांबहिर्नयनेयजमानाऽसंनिधौहोमकालेवानागतायांवालौकिकत्वंभवदिति। छंदोगपरिशि १६
ष्टे। विहायाग्नीन्सभार्यश्चेत्सीमामुल्लंघ्यगच्छतिहोमकालेसैयेतस्यपुनराधेयमिष्यते। पुनरजस्र

पले॥ सहयजमानपत्न्याप्रवासंप्रकृत्योक्तं। यावत्योग्राममर्यादानद्यश्चतावतीरतीक्रामंतावनन्या
रमेयातांलौकिका:संपद्येरन्निति॥ अथनदीलक्षणं॥ कूलद्वयांतरलेनुनदीशब्देनउच्यते। न
किंतुद्रवस्यैवजलसंघोनदीभवत्। शब्देनोच्यते॥ अष्टौधनु:सहस्राणिपरिस्रवतियज्जलं। नदी
शब्दाभिधेयत्वंतस्येच्छंतिसूरय:। अन्यत्रापि। विनाग्निभिर्यदापत्नीनदीमंबुद्धिगामिनी। अतिक्रम
तदाग्नीनांविनाशस्यादितिश्रुति:। अग्निहोत्रअपणार्थमपाढस्यानुगमनेपुनराधेयसर्वप्रायश्चि
त्तं अपाढदीप्यमानेगार्हपत्यानुगमनेअपाढैकदेशमाहृत्यप्रक्षिप्यसर्वप्रा॰। महापित्र्यज्ञिकवेध
नो। मन्याधानात्पूर्वमनेयोनित:प्रणयनंसर्वप्राय॰। अन्वाहितेअन्वाधानंप्रायश्चित्तमेव। पित्र्य
ज्ञांतरस्याहवनीयस्यानुगमनेमंथनादि। त्र्यंबककत्वग्न्यनुगतेसर्वप्रायश्चित्तंकृत्वापुनर्दक्षिणा
ग्नेरादरणं। दिशाग्धोमकालादाहवनीयानुगच्छेद्गार्हपत्यादन्यंप्रणयेत्। यद्यग्निहोत्रहोमकालेहवि
:शुश्रूषूपसादनात्प्राक्आहवनीयोनुगच्छेत्। तदाअनुगतआहवनीयमुत्सादयिष्यामीतिसंकल्प्यगा
र्हपत्यादन्यंप्रणीयमंत्रेस्तूष्णींवासर्वप्रायश्चित्तंकर्तव्यं। नात्रमित्रादिहोम:। एतत्प्रात:कालविषयमेव

Indira Gandhi National
Centre for the Arts

प्राय० सायंकालस्यतु अग्रेवक्ष्यामः। दक्षिणाग्न्यनुगमनेतु पूर्वोक्तमेव। यदिहोमकाले प्राणउदानमप्य
१७ गादिति गार्हपत्ये जुहुयाद्यदि। चत्वारो होमकालास्तत्र पश्चादाहवनीयं कुशेषु हविरासाद्येत्ययंप्रथ
मः पक्षः। होमकाले यदि गार्हपत्योऽनुगच्छेत्तत उदानः प्राणमप्यगात्स्वाहेत्याहवनीय आज्याहुतिं जु
हुयात् उदानायेदं। ततो भस्मनारणी संस्पृश्य मंथनं कृत्वाऽऽयतने निधाय होमसमाप्तिः॥ ॥नान्य
त्प्रायश्चित्तं। अस्मिन्नेव काले दक्षिणाग्निरनुगच्छेद्व्यानउदानमप्यगात्स्वाहेति गार्हपत्ये जुहोति
।व्यानायेदं। ततस्तूष्णीं दक्षिणाग्निं योनित उत्पाद्य पूर्ववद्धोमसमाप्तिः॥ ॥यदिहोमकाले आह
वनीयोऽनुगच्छेत्तदा प्राणउदानमप्यगात्स्वाहेति गार्हपत्ये आज्याहुतिं हुत्वाऽऽहवनीयस्य भस्मनालौ
किकारणीलेपयित्वा मंथनं कुर्यात्। नात्राऽन्यत्प्रायश्चित्तं आयतने निधाय शेषं कर्म समापयेत्।
होमेजाते गार्हपत्यवर्जं योऽनुगच्छेत्तस्य नोत्पत्तिः। तत्कर्मणां लोप एव। अनाज्ञातं जपं कृत्वेतरयोर्हो रा॰म॰
मेसमाप्तिः॥ होमे कृते गार्हपत्योऽनुगच्छेद्यस्याहवनीयेऽनुद्धाते गार्हपत्यउद्धायदुत्स्कन्नप्रकारेण न १७
स्यान्त्यतिः। यदिहोमकाले गार्हपत्याहवनीयौ युगपदनुगच्छेयातां तदाऽनाज्ञातं जपं कृत्वा गार्हपत्ये

मथित्वाऽऽयतने निधाय। प्राणउदानमप्यगात्स्वाहेति आहवनीयार्थं गार्हपत्ये आहुतिं हुत्वाऽऽहवनीयं मथि
त्वाऽऽयतने निधाय गार्हपत्यार्थमाहवनीये उदानमप्यगात्स्वाहेति आहुतिं जुहोति। यदि गार्हपत्यदक्षि
णाग्नी युगपदनुगच्छेयातां तदाऽनाज्ञातं जपं कृत्वा गार्हपत्यार्थमुदानः प्राणमप्यगात्स्वाहेत्याहव
नीये हुत्वा गार्हपत्यं मथित्वाऽऽयतने निधाय तस्मिन् व्यानमप्यगात्स्वाहेति हुत्वा तूष्णीं दक्षिणाग्नेः प्रणय
नं। यदि दक्षिणाग्न्याहवनीयौ युगपदनुगच्छेयातां। प्राणउदानमप्यगात्स्वाहेति गार्हपत्ये हुत्वाऽऽहवनी
यं मंथित्वाऽऽयतने निधाय। व्यानउदानमप्यगात्स्वाहेति गार्हपत्ये हुत्वा तूष्णीं दक्षिणाग्नेः प्रणयनं।
